# संस्कृतवार्ता:

11.09.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· प्रधानमन्त्रिणा नरेन्द्रमोदिना नोएडानगरे सेमिकॉन्-इंडिया इत्यस्य सत्रस्य उद्घाटनं कृतम् दशकस्य अन्तिमकालं यवात् भारतस्य विद्युदुपकरणानां क्षेत्रं पञ्चशतं बिलियन-डॉलर-मूल्यकं कर्तुं सङ्कल्पः च समुच्चारितः ।

· जलवायु-परिवर्तनं ऊर्जा-संक्रमणं च वैश्विक-चिन्ताः सन्ति इति प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोक्तम् ।

· वाणिज्य-उद्योग-मन्त्री पियूष्-गोयल्-वर्यः भारतीय-उद्यमशीलानां कृते अन्ताराष्ट्रिय-व्यापारस्य सुगमतां प्रवर्धयितुं ट्रेड्-कनेक्ट् ई-प्लाट्फ़ार्म् इत्यस्य उद्घाटनं कृतवान् ।

· वियतनामदेशे टाइफून-यागी इत्यनेन चक्रवातेन मृतानां सङ्ख्या पञ्चपञ्चाशदुत्तरैकशतं यावत् सञ्जाता ।

· हॉकीक्रीडा-द्वन्द्वे, भारतेन मलेशियादलं एकम् क्रीडनाङ्कं विरुध्य अष्टक्रीडनाङ्कैः पराजित्य उपान्त्यचक्रे प्रविष्टम् ।

<u>प्रधानमन्त्री-सेमिकॉन्</u>

अद्य सिलिकान्-कूटनीतेः युगम् अस्ति, भारतं च सेमिकण्डक्टर् इत्यस्य बृहत्तमोत्पादन-केन्द्रं भवितुं प्रत्येकं उपायं करिष्यति इति प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोक्तम्। सः अवदत् यत्, उपकरणेषु प्रयुज्यमाणस्य चिप्-इत्यस्य उत्पादन-संख्यां वर्धयितुं सर्वकारः अवधानं यच्छति। अद्य ग्रेटर्-नोयडा इत्यत्र <u>सेमिकान्-भारतम्</u> इत्यस्य कार्यक्रमस्य उद्घाटनानन्तरं प्रधानमन्त्री भाषमाणः आसीत् । स्वकीये भाषणे, प्रधानमन्त्री देशे विद्युदुपकरणानां, सेमिकण्डक्टर् इत्यस्य च व्यापारं वर्धयितुं सर्वकारेण कृताः विविधाः प्रोत्साहनोपक्रमाः समुद्घाटिता। सः अवदत् यत् अस्य दशकस्य अन्तिमकालं यावत् देशस्य विद्युदुपकरणानां क्षेत्रम् पञ्चशतं बिलियन्-डालर्-मूल्यकं निर्मातुं सर्वकारेण लक्ष्यम् निर्धारितम् अस्ति । डिजिटल् इण्डिया इत्यस्य उपक्रमस्य सफलतायाः विषये अपि प्रधानमन्त्रिणा प्रोक्तं यत् देशे अस्य बहुगुणक-प्रभावः दृश्यते । सः अवदत् यत् पूर्वं देशः

दूरवाण्याः आयातं करोति स्म, परन्तु अधुना सः दूरवाण्याः द्वितीयं बृहत्तमं उत्पादकं निर्यातकं च अस्ति। अस्मिन् अवसरे सूचना-प्रौद्योगिक-मन्त्री अश्विनीवैष्णवः अवदत् यत्, सर्वकारेण डिजिटल् इण्डिया , टेलिकाम्-मिशन् इत्येतयोः माध्यमेन नागरिकाणां हस्तेषु प्रौद्योगिकी समानीता । अस्माकं संवाददातृणां प्रोक्तं यत् सेमिकान्-भारतं इत्यस्मिन् कार्यक्रमे वैश्विक-सेमिकण्डक्टर्-निर्माणविशेषज्ञानां शीर्षनेतृत्वं सहभागं करिष्यति । अस्मिन् सम्मेलने पञ्चाशदुत्तर-द्विशततो अधिकाः प्रदर्शकाः, पञ्चाशदुत्तरैकशतं वक्तारः च भागं ग्रहीष्यन्ति ।

<u>प्रधानमन्त्री-जलवायु</u>

जलवायु-परिवर्तनं ऊर्जा-संक्रमणं च वैश्विक-चिन्ताः सन्ति इति प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोक्तम् डीकार्बनाईसेशन् इत्यत्र हरित-हैड्रोजन् इत्यस्य प्रभावं सम्वर्धितुं अन्ताराष्ट्रिय-सहभागित्वम् महत्त्वपूर्णम् अस्ति। अद्य दृष्य-श्रव्य-माध्यमेन हरित-हैड्रोजन्-विषये अन्ताराष्ट्रिय-सम्मेलनम् संबोधयन्, प्रधानमन्त्री प्रोक्तवान् यत् उत्पादनस्य वर्धनं, व्ययस्य न्यूनीकरणं, निर्माणं च परस्परसहयगेन द्रुतगत्या प्रगतिं कर्तुं शक्नोति।

<u>ट्रेड्-कनेक्ट् ई-प्लाट्फ़ार्म्</u>

वाणिज्य-उद्योग-मन्त्री पियूष्-गोयल्-वर्यः अद्य नवदिल्ल्याम् एकस्मिन् कार्यक्रमे भारतीय-उद्यमशीलानां कृते अन्ताराष्ट्रिय-व्यापारस्य सुगमतां प्रवर्धयितुं ट्रेड्-कनेक्ट् ई-प्लाट्फ़ार्म् इत्यस्य उद्घाटनं कृतवान्। कार्यक्रमं संबोधयन् श्री गोयल् वर्यः अवदत् यत् ट्रेड्-कनेक्ट् ई-प्लाट्फ़ार्म् इति विविधमन्त्रालयानां, संस्थानां, संगठनानां च मध्ये सहयोगं वर्धिष्यति। सः उल्लेखं अकरोत् यत् एषः मञ्चः भविष्यकालीनः अस्ति तथा च विविध-सूचनानां दत्तांशानां च सुलभतां वर्धयिष्यति। मन्त्रिवर्यः इदमपि अकथयत् यत् आगामि-संस्करणानि हिन्दीभाषायां तथा अन्यासु आधिकारिक-भारतीय-भाषासु अपि उपलभ्यन्ते।

<u>वियतनाम-य़ागी</u>

वियतनामदेशे, टाइफून-यागी इत्यनेन चक्रवातेन मृतानां सङ्ख्या पञ्चपञ्चाशदुत्तरैकशतं यावत् सञ्जाता, यस्यानन्तरं अद्य राजधान्याः हनोई-क्षेत्रात् सहस्राधिकाः नागरिकाः सुरक्षिताः निष्काषिताः सन्ति । स्थानीय-सञ्चार-माध्यमैः ज्ञातम् यत्, ह्यः लावो-काई-प्रान्तस्य दूरस्थे

पर्वतग्रामे लाङ्ग्-नू इत्यत्र अपि यागीचक्रवातेन भूस्खलनं सञ्जातम् , येन न्यूनातिन्यूनं द्वाविंशतिः जनाः मृताः।

## एशिया-प्रशान्त-मन्त्रिस्तरीय-सम्मेलनम्

नागरिक-उड्डयनम् इत्यस्मिन् विषये द्वितीयं एशिया-प्रशान्त-मन्त्रिस्तरीय-सम्मेलनम् अद्य नवदिल्ल्यां भारतमण्डपं इत्यत्र समारप्स्यते । अन्ताराष्ट्रिय-नागरिक-उड्डयन-सङ्घटनम्, नागरिक- उड्डयन -मन्त्रालयः च सम्मिल्य द्विवार्षिकस्य कार्यक्रमस्य आयोजनं कुरुतः । भारतं विश्वस्य द्रुतगत्या वर्धमानं विमानन-विपणिकेन्द्रम् अस्ति, सम्प्रति च निजक्षेत्रे तृतीयं बृहत्तमम् विपणिकेन्द्रम् अस्ति। गतदशके भारते विमानयानानां सङ्ख्या चतुश्शततो सम्वर्ध्य अष्टशततः अधिका जाता अस्ति, विमानस्थानकानि चतुर्सप्ततितः सम्वर्ध्य सप्तपञ्चाशदुत्तरैकशतं यावत् वर्धितानि सन्ति। सर्वकारस्य उडान् इत्यादिभिः उपक्रमैः क्षेत्रीय-सम्पर्कं वर्धितम् अस्ति, येन दूरस्थानि क्षेत्राणि अपि विमानयान-सञ्जाले एकीकृतानि भवेयुः इति सुनिश्चितं कृतमस्ति ।

## जम्मू-कश्मीरः-निर्वाचनम्

जम्मू-कश्मीर-प्रदेशे, गतसप्ताहे समारब्धे विधानसभानिर्वाचनस्य प्रथमचरणस्य प्रवर्तमाने प्रचारमध्ये , चिनाबस्य डोडा-क्षेत्रस्थे क्रीडाङ्गणे सितम्बर-मासस्य चतुर्दश-दिनाङ्के प्रधानमन्त्रिणः नरेन्द्रमोदिनः उच्चस्तरीयायै जनसभायै सज्जता प्रचलति । अस्माकं संवाददाता अकथयत् यत् लोकसभायाः विपक्षनेता राहुलगान्धी अपि डोडा-नगरे जनसभां सम्बोधयिष्यति , परञ्च तस्य सम्बोधन-कार्यक्रमः अधुना यावत् निर्धारितः नास्ति । प्रधानमन्त्री मोदीं राहुलगान्धीं च अतिरिच्य काङ्ग्रेस्-दलस्य अन्यः एकः प्रमुख-प्रचारकः इम्रान् प्रतापगढी इत्येषः अपि सितम्बरमासस्य त्रयोदश-दिनाङ्के चार्वा कहरा इत्यत्र जनसभां सम्बोधयिष्यति, अपरत्र नैशनल्-कान्फ्रेन्स्-दलस्य प्रमुख-प्रचारकः ओमर्-अब्दुल्ला द्वादश-दिनाङ्के डोडा-क्षेत्रे कांश्चन् जनसभाः सम्बोधयिष्यति।

कच्छ-ज्वरप्रकोपः

गुजरातराज्ये गतसप्ताहे कच्छ-नगरस्य अब्दासा-लखपत्-प्रदेशयोः अज्ञातज्वरस्य प्रकोपात् एकादश जनाः मृताः इति राज्यसर्वकारेण पुष्टीकृतम् । कच्छ-नगरस्य भ्रमणं कुर्वन् राज्यस्य स्वास्थ्यमन्त्री ऋषिकेश-पटेलः प्रसार-माध्यमान् संसूचितवान् यत् षोडश-सन्दिग्ध-मृत्युषु एकादश-जनाः अज्ञातज्वर-प्रकोपात् मृताः, शेषाः पञ्च जनाः च अन्यैः विभिन्नैः रोगैः मृताः । मन्त्रिवर्यः अवदत् यत्, राज्यसर्वकारेण रोगिणां चिकित्सायै विस्तृता व्यवस्था कृता अस्ति ।

मालदीव-त्यागपत्रम्

भारतीय-प्रधानमन्त्रिणं विरुद्ध्य अपमानजनकं टिप्पणीम् अधिकृत्य मालदीवस्य निलम्बितौ द्वौ मन्त्रिणौ त्यागपत्रं दत्तवन्तौ। स्थानीय-संचार-सूचना-माध्यमैः ज्ञातम् यत्, मरियम्-शिउना, माल्शा-शरीफः च व्यक्तिगत-कारणम् उद्दिश्य त्यागपत्रम् प्रायच्छताम् । ध्यानास्पदं वर्तते यत् अस्य वर्षस्य जनवरीमासे प्रधानमन्त्रिणं नरेन्द्रमोदिनं , भारतीयजनान् च विरुध्य कृताः टिप्पण्यः अधिकृत्य शिउना-माल्शा, अब्दुल्-महज़ूम्-मजीदः च निलम्बितौ अभवताम् ।

जम्मू-कश्मीरः-पाकिस्तानः

जम्मू-कश्मीरे अद्य प्रातः सङ्घर्षविरामस्य उल्लङ्घनं कुर्वन्तः पाकिस्तानस्य सैनिकाः अकारणं भारतीयसैन्यस्थात्रेषु गोलिकाप्रहारं कृतवन्तः यस्मिन् सीमा-सुरक्षा-बलस्य एकः सैनिकः व्रणितः सञ्जातः । अस्माकं सम्वाददाता अकथयत् यत् सीमा-सुरक्षा-बलस्य सैनिकैः अपि सतर्कतया प्रत्युत्तरं प्रदत्तं परञ्च पाकिस्ताने हताहतानां सद्यैव ज्ञानं नाभवत् ।

हॉकी-चषकम्

हॉकीक्रीडा-द्वन्द्वे, विगतवर्षस्य विजेतृदलेन भारतेन अद्य मध्याह्ने चीनस्य हुलुनबुइर क्रीडाङ्गणे राउंड-रॉबिन- इत्यस्मिन् क्रीडाचरणे पुरुषाणां एशिया-चषक क्रीडाद्वन्द्वे मलेशियादलं एकम् क्रीडनाङ्कं विरुध्य अष्टक्रीडनाङ्कैः पराजित्य उपान्त्यचक्रे प्रविष्टम् । राजकुमारपालेन निरन्तरं क्रीडनाङ्कत्रयं समर्जितं अपरत्र अरिजीत-सिंह्-हुंडलेन च क्रीडनाङ्कद्वयं समर्जितम् ।

।। इति वार्ताः।।